कर्नाटकप्रशासनम्

# संस्कृतरश्मिः-२

## तृतीयभाषा - संस्कृतम

## सप्तमी कक्ष्या

(Revised)

## द्वितीयः भागः

7

©KTBS
NOT TO BE REPUBLISHED

# SAMSKRITHA RASHMI-2

## SEVENTH STANDARD

## THIRD LANGUAGE - SANSKRIT

## PART-2

**KARNATAKA TEXTBOOK SOCIETY (R)**
**6th Cross, Malleshwaram, Bengaluru-560 003.**

# पाठानुक्रमणिका


| | | पृष्टाङ्कः |
|---|---|---|
| दशमः पाठः | गीतामृतम् | १ |
| एकादशः पाठः | पाजकक्षेत्रम् | ४ |
| द्वादशः पाठः | बसवेश्वरः | ९ |
| त्रयोदशः पाठः | सुबन्तप्रकरणम्–२ | १३ |
| चतुर्दशः पाठः | सन्धिप्रकरणम् | १६ |
| पंचदशः पाठः | सुभाषितानि (कण्ठपाठः करणीयः) | १९ |
| षोडशः पाठः | आधुनिकः संस्कृतकविः<br>डा सि.जि.पुरुषोत्तमवर्यः | २४ |
| सप्तदशः पाठः | तिङन्तप्रकरणम्–२ | २९ |
| अष्टादशः पाठः | प्राचीनविज्ञानिनः | ३० |
| एकोनविंशतः पाठः | आजादः चन्द्रशेखरः | ३६ |
| विंशतः पाठः | चाटुश्लोकाः | ४२ |
| एकविंशतः पाठः | सङ्ख्यावाचकाः | ४६ |
| परिशिष्टम् | १. भाषान्तराभ्यासः | ५१ |
| | २. अमरकोशसङ्ग्रहः | ५३ |
| | ३. पाठयोजना | ५४ |


©KTBS NOT TO BE REPUBLISHED

दशमः पाठः

नीतिः

# गीतामृतम्



भारतं पञ्चमो वेदः इति महाभारतस्य प्रसिद्धिः वर्तते। महत्वात् भारवत्त्वात् च महाभारतम् इति उच्यते। व्यासविरचिते गणेशलिखिते अस्मिन् महाभारते भगवद्गीता प्रसिद्धा वर्तते। भीष्मपर्वणि भगवान् श्रीकृष्णः अर्जुनम् उपदिशति। एषा भगवद्गीता सामाजिक, आर्थिक, शैक्षणिकादीन् अमूल्यान् विचारान् बोधयति। केचन श्लोकाः अत्र प्रदत्ताः।

१. सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि।। (२-३८)

२. यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्।। (४-०७)

३. परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे।। (४-०८)

४. न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।
तत् स्वयं योगसंसिद्धः कालेनात्मनि विन्दति।। (४-३८)

५. अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्।। (९-२२)

## अन्वयार्थः

१. जयाजयौ लाभालाभौ सुखदुःखे समे (समानम्) कृत्वा ततः युद्धाय युज्यस्व, (सिद्धः भव) एवं पापं न अवाप्स्यसि। (विन्दसि)

२. भारत, (अर्जुन) यदा यदा धर्मस्य ग्लानिः (नाशः) अधर्मस्य अभ्युत्थानम् (अभिवृद्धिः) भवति तदा हि अहम् आत्मानं सृजामि (अवतारं करोमि)।

४. इह ज्ञानेन सदृशं पवित्रं हि न विद्यते। तत् कालेन स्वयं योगसंसिद्धः (शुद्ध-अन्तः करणयुक्तः पुरुषः) आत्मानि विन्दति।

५. ये अनन्याः जनाः मां - चिन्तयन्तः पर्युपासते (ध्यायन्ति) तेषां नित्याभियुक्तानां योगक्षेमम् अहं वहामि। (अनन्याः = एकचित्तीभूय ये जनाः)
(अत्र योगः→अप्राप्तस्य प्राप्तिः।
क्षेमः→प्राप्तस्य संरक्षणम्।)

NOT TO BE REPUBLISHED ©KTBS

## अभ्यासः

### १. मौखिकप्रश्नाः।

१. युगे युगे कः सम्भवति?
२. कः योगक्षेमं वहति?
३. योगो नाम कः?

## २. एकावाक्येन उत्तरत।

१. महाभारतग्रन्थं कः विरचितवान्?

२. कस्मिन् पर्वणि गीता अस्ति?

३. भगवद्गीता किदृशान् विषयान् बोधयति?

## ३. विरुद्धपदं लिखत।

१. धर्मः x __________

२. साधुः x __________

३. लाभः x __________

४. सुखम् x __________

५. पापम् x __________

## ४. समानार्थकपदं लिखत।

१. भारत = २. व्यासः =

**भाषाभ्यासः -** गीतामहत्त्वं जानन्तु। सप्तम – अध्यायस्य श्लोकान् कण्ठपाठं कुर्वन्तु।

*.*.*.*

@KTBS NOT TO BE REPUBLISHED

**यावदेषा देवभाषा**
**देवी स्थास्यति भूतले।**
**यावच्च वंशोऽस्त्यार्याणां**
**तावदेषा ध्रुवं ध्रुवा।।**

# एकादशः पाठः

**षष्ठीविभक्तिः**

## पाजकक्षेत्रम्

**पीठिका** – भारतं नाम महापुरुषाणां मुनीनां तत्त्वबोधकानाम् अवतारैः पुनीतः देशः। एषा भारतभूमिः श्रेष्ठपर्वतैः पुण्यक्षेत्रैः पुण्यतीर्थैः च पवित्रा। समस्तलोक मार्गदर्शकाः श्रेष्ठाः अत्रैव अवतीर्णाः। एवम् एषा भूमिः पुण्यभूमिः, धर्मभूमिः, कर्मभूमिः इति च प्रसिद्धा। पुण्यक्षेत्राणां सन्दर्शनेन ज्ञानं मनसः शान्तिः च वर्धते। जीवनसार्थक्यं च भवति। तादृशेषु पावनक्षेत्रेषु पाजकक्षेत्रम् अन्यतमम्।
**उद्देशः** – छात्राः पुण्यक्षेत्राणां विषये उत्सुकाः भवेयुः। साधकानां महिमानं ज्ञात्वा तेषां विषये बद्धादराः भवन्तु।



१. पाजकक्षेत्रं **महापुरुषस्य श्रीमध्वाचार्यस्य** अवतारेण सुविख्यातम्। अस्मिन् पाजकक्षेत्रे **द्वैतमतस्थापकस्य साधकवरेण्यस्य श्रीमध्वाचार्यस्य** जन्म अभवत्। इदं पुण्यक्षेत्रं कर्णाटकराज्ये उडुपिक्षेत्रसमीपे विराजते। उडुपितः यानमार्गे गच्छामः चेत् त्रयोदश कि.मी दूरे, पादमार्गे गच्छामः चेत् षट् कि.मी. दूरे एतत् पवित्रस्थलं सुशोभते। क्रि.श. अष्टात्रिंशदुत्तरद्वादश शततमे (१२३८) वर्षे विजयदशमी पर्वदिने द्वैतवेदान्तदर्शनप्रवर्तकः श्रीमध्वाचार्यः कर्णाटकस्य

कीर्तिं वर्धयितुम् अस्मिन् क्षेत्रे अजायत। तस्य पिता परमधार्मिकः मध्यगेहभट्टः। माता सुशीला वेदवती। बाल्ये **तस्य** नाम वासुदेव इति आसीत्। श्रीमध्वाचार्यः पाजकक्षेत्रे बाल्यम् अनुभूतवान्। अस्मिन् क्षेत्रे **श्रीमध्वाचार्यस्य** कुलदेवः श्री अनन्तपद्मनाभः विराजते। एतस्य **देवालयस्य** समीपे वासुदेवतीर्थं सुशोभते। अस्य **तीर्थस्य** उद्भवविषये एका कथा वर्तते।

२. अस्य **पाजकक्षेत्रस्य** नातिदूरेषु, पृथक्प्रदेशेषु भगवता परशुरामेण स्वायुधैः निर्मितानि परशुतीर्थं,गदातीर्थं, धनुस्तीर्थं, बाणतीर्थम् इति चत्वारि पवित्रतीर्थानि सन्ति। एतेषु तीर्थेषु स्नानं पापनिवारकम् इति भक्ताः भावयन्ति। बालकः वासुदेवः अपि प्रतिदिनम् एतेषु तीर्थेषु स्नानम् अकरोत्। **वासुदेवस्य** माता वेदवती पुत्रवात्सल्येन एकाकिनः बालकस्य अरण्यप्रदेशे स्नानार्थं गमनम् अहितकरम् इति **वासुदेवस्य** तीर्थस्नानं निराकरोत्। तदा बालकः वासुदेवः मातृवचने बद्धादरः, तीर्थस्नाने आसक्तः सन् स्वदण्डेन एव गृहसमीपे खनित्वा तीर्थनिर्माणं कृतवान् इति कथा श्रूयते। अस्मिन् तीर्थे तेषां चतुर्णां तीर्थानांपवित्रजलं सम्मिलितम् इति आस्तिकाः मन्यन्ते।



३. **अनन्तपद्मनाभदेवालयस्य** उत्तरपार्श्वे एका शिला अस्ति। तत्र बालकः वासुदेवः पितुः सकाशात् अक्षराभ्यासं प्राप्तवान् इति कथ्यते।

४. अस्यैव **देवालयस्य** समीपे पश्चिमायां दिशि कुञ्जारुगिरिः इति एकः शिलामयःउन्नतप्रदेशः दृश्यते। तस्य पर्वतस्य विमानगिरिः इति नामान्तरं विद्यते, यतः पर्वतोऽयं विमानवत् दृश्यते। पर्वतस्य शिखरे देव्याः श्रीदुर्गापरमेश्वर्याः देवालयः विराजते। बालकः वासुदेवः प्रतिदिनं दुर्गादेवीम् अर्चितुम् एतं पर्वतं

गच्छति स्म। एकदा दुर्गादेवीं यदा वासुदेवः पूजयति स्म । तदा माता वेदवती तं भोजनाय गृहतः आहूतवती। मातृभक्तिपरवशः वासुदेवः विमानगिरितः सहसा गृहं प्रति लङ्घनं कृत्वा गृहसमीपे अतिष्ठत्। तदा तस्य पादाघातेन शिलायां पादचिह्नं जातम्। इदानीम् अपि भक्ताः पादचिह्नं भक्त्या पूजयन्ति।

५. एकदा विमानगिरेः गृहं प्रति वासुदेवस्य आगमनमार्गे मणिमान् नाम सर्परूपीराक्षसः वासुदेवं दृष्ट्वा तं हन्तुं मतिम् अकरोत् अदशत् च। बालकः वासुदेवः तदा तं दानवं पादाङ्गुष्ठेन समहरत्। अस्याः घटनायाः सङ्केतम् अद्यापि भक्ताः दर्शयन्ति। एवमेव तत्रानेकानि स्थलानि सन्ति यानि श्रीमध्वाचार्यस्य महिमानं वर्णयन्ति। ग्रामीणाः एतत् क्षेत्रं 'पादे' इत्यपि कथयन्ति।



६. अयं प्रदेशः प्रकृत्या अतिमनोहरः वर्तते। हरिद्वर्णयुक्तं काननं सर्वत्र सुशोभते। तृणानां मध्ये तत्र तत्र शिलाः वृषभाः इव दृश्यन्ते। अन्यत्र विमलोदकाः जलाशयाः चित्ताकर्षकाः विराजन्ते। एवम् इदं क्षेत्रं **भगवदाराधकाणां निसर्गाराधकाणां** च दर्शनयोग्यं स्थलम् इति सुनिश्चितम्। अत एव श्रीवादिराजयतिवरेण्यः तीर्थप्रबन्धः इति ग्रन्थे इदं क्षेत्रम् अधिकृत्य वर्णितवान्–

पवित्रं पाजकक्षेत्रं को न सेवेत कोविदः।
सत्यलोकेश्वरः प्राणो यत्रावातरदुत्सुकः।।

इति।

*.*.*.*

**अवधेयांशाः-**

एतत् क्षेत्रं विद्यार्थिनां कृते प्रवासयोग्यं स्थलम् इति मत्वा क्षेत्रं प्रति मार्गसूची दत्ता अस्ति।




**Web links :** lord Vishnu.co.in.http:
www.ancient literature.com

## शब्दार्थः

| | | |
|---|---|---|
| पावनक्षेत्रम् = पवित्रं क्षेत्रम् | ಪವಿತ್ರ ಸ್ಥಳ | Holy place |
| खनित्वा = खननं कृत्वा | (ನೆಲವನ್ನು) ಅಗೆದು | Digging |
| सम्मिलितम् = संयुक्तम् | ಸೇರಿದ | Together |
| यतः = किमर्थम् इत्युक्ते | ಏಕೆಂದರೆ | because |
| सहसा = झटिति | ಒಮ್ಮೆಲೇ | suddenly |
| दष्ट्वा- दंशनं कृत्वा | ಕಚ್ಚಿ | bite |
| हन्तुं = संहारं कर्तुम् | ಕೊಲ್ಲಲು | kill |

©KTBS NOT TO BE REPUBLISHED

## अभ्यासः

### १. मौखिकप्रश्नाः

१. उडुपिक्षेत्रं कुत्र अस्ति?

२. उडुपिक्षेत्रे विराजमानः देवः कः?

३. श्रीमध्वाचार्येण प्रतिपादितं तत्त्वं किम्?
४. इतरेषाम् आचार्याणां नामानि वदत।

## २. रिक्तस्थानानि पूरयत-

१. इदं क्षेत्रं कर्णाटकराज्ये ______________समीपे विराजते।
२. बाल्ये तस्य नाम ______________ आसीत्।
३. श्रीमध्वाचार्यः तस्य बाल्यं ______________ अनुभूतवान्।
४. तीर्थेषु स्नानं ______________ इति भक्ताः भावयन्ति।
५. कुञ्जारुगिरेः ______________ इति नामान्तरं विद्यते।

## ३. उदाहरणानुसारं रूपाणि कुरुत -

१. पठ् + क्त्वा → पठित्वा
२. खन् + क्त्वा → ____________
३. लिख् + क्त्वा → ____________
४. गम् + क्त्वा → ____________
५. दृश्+ क्त्वा → ____________
५. कृ+ क्त्वा → ____________

## ४. समानार्थकपदानि लिखत-

१. पावनम् २. पर्वतः ३. सुतः ४. शोभते ५. माता

## ५. विरुद्धार्थकपदानि लिखत -

१. गच्छति २. दानवः ३. पुण्यम् ४. आसक्तिः

## ६. क्रियापदानां लकार - पुरुष - वचनानि लिखत -

१. अकरोत् २. भावयन्ति ३. समहरत् ४. शोभते ५. अजायत

## ७. पदानां लिङ्ग - विभक्ति - वचनानि लिखत-

१. प्रदेशेषु २. एतस्य ३. पर्वतम् ४. अवतारेण

*.*.*.*

@KTBS NOT TO BE REPUBLISHED

# द्वादशः पाठः

प्रथमाविभक्तिः

## बसवेश्वरः



NOT TO BE REPUBLISHED ©KTBS

**कर्नाटकराज्ये अनेके समाजसुधारकाः सन्तः जन्म प्राप्तवन्तः। तेषु बसवेश्वरः अग्रगण्यः विराजते। तस्य जीवनवृत्तान्तम् अत्र संगृह्य प्रदत्तम्**

कर्नाटकराज्यस्य विजयपुरमण्डलस्य बागेवाडि ग्रामे मादरस इति पुरप्रमुखः साम्प्रदायिकः ब्राह्मणः आसीत्। तस्य पत्नी मादलाम्बिका। सा च सद्भक्तिसम्पन्ना। तयोः पुत्री नागलाम्बिका। मादरसमादलाम्बिकयोः पुत्र एव बसवरसः। सः ११३१ तमे वर्षे वैशाखशुद्धतृतीयायां रोहिणीनक्षत्रे मातृगृहे इङ्गलेश्वरे जनिम् अलभत।

शिशोः जननान्तरं कूडलसङ्गमात् आगतः जातवेदः आशीश्चकार। बसवरसः बाल्ये एव तीक्ष्णमतिः सत्यशोधकश्च आसीत्। अष्टमे वयसि उपनयनसंस्कारः आयोजितः। किन्तु बाल्ये एव जातवेदमुनिना लिङ्गदीक्षितः सः यज्ञोपवीतधारणं तिरश्चकार। मोक्षसाधनार्थं गृहं त्यक्त्वा कूडलसङ्गमम् आगतवान्।

तस्य अग्रजा नागलाम्बिका तं प्रोत्साहयन्ती तमेव अन्वसरत्। बसवरसः तत्र सङ्गमनाथम् अर्चयन् जातवेदमुनिनिकटे वेदागमशास्त्राणि अधीतवान्। बसवरसः वसवेश्वरः सञ्जातः।

बलदेवः बसवेश्वरस्य मातुः सहोदरः(मातुलः)। सः कल्याणराज्ये आसीत्। तस्य पुत्री गङ्गाम्बिका। तया सह बसवेश्वरस्य विवाहः अभवत्। बसवेश्वरः कूडलसङ्गमात् कल्याणं गतवान् बिज्जलराजस्य आस्थाने लिपिकारः, भण्डारी, मन्त्री च अभवत्। सर्वसमानं कायकतत्त्वं, भक्तितत्त्वं, दासोहनिष्ठां च प्रत्यपादयत्। सः वर्णरहितं वर्गरहितं धर्मं प्रतिष्ठापयामास।

अत्रैव बसवेश्वरः अनुभवमण्डपं रचयित्वा तत्र शून्यपीठं प्रतिष्ठाप्य अल्लमप्रभुम् तस्य अध्यक्षं चकार। लिङ्गजातिभेदं विना सर्वेषामपि इष्टलिङ्गदीक्षाम् अयच्छत्। ब्राह्मणस्य मधुवरसस्य पुत्र्याः विवाहं निम्नवर्गस्य हरलय्यस्य पुत्रेण सह कारितवान्। अनेके शरणाः तत्र उपस्थिताः। अनेन बसवेश्वरः सामाजिकस्य धार्मिकस्य च क्रान्तेः जनकः संवृत्तः।

किन्तु तस्य औन्नत्यम् असहमानाः कोण्डे मञ्चण्णादयः बिज्जलराजस्य कर्णयोः विषम् आरोपयामासुः। अन्तर्जातिविवाहव्याजेन समाजे महान् विरोधः समजनि। तदनु बिज्जलमहाराजः निरपराधिनां शरणानां हरलय्यमधुवरसयोश्च नेत्राणि कर्तयित्वा तान् गजपादेषु बद्ध्वा बलात् आकर्षितवान्। अनया चित्रहिंसया परिदग्धहृदयः बसवेश्वरः कल्याणं त्यक्त्वा कूडलसङ्गमं आगत्य सङ्गमनाथे ऐक्यं गतः। बसवेश्वरः ''जगज्ज्योतिः'' ''विश्वगुरुः'' ''भक्तिभण्डारि'' अण्ण इत्यादिभिः नामभिः प्रख्यातः । सः सहस्राधिकानि वचनानि रचितवान्। तत्र एकम् उदाहरणमिदम् –

**देवलोक मर्त्यलोकवेम्बुदु बेरिल्ल काणिरो।**
**सत्यव नुडिवुदे देवलोक, मिथ्यव नुडिवुदे मर्त्यलोक!**
**आचारवे स्वर्ग, अनाचारवे नरक!**
**कूडलसङ्गमदेव नीवे प्रमाणु!**

©KTBS NOT TO BE REPUBLISHED

**अस्य वचनस्य अनुवादः अयम् -**

**देवलोकमर्त्यलोकौ नाभिन्नौ पश्यत।**
**सत्योक्तिरेव देवलोकः मिथ्योक्तिरेव मर्त्यलोकः।**
**आचार एव स्वर्गः । अनाचार एव नरकः।**
**कूडलसङ्गमदेव ! त्वमेवात्र प्रमाणम्।।**

(अनुवादकः - एम्.जि. नञ्जुण्डाराध्य)

## अवधेयांशः

विशेषार्थम् अवलोकयत

1. Sri Basaveshwara - Directorate of Kannada and Culture, Bengaluru

2. बसववचनामृतम् - एम्.जि, नञ्जुण्डाराध्या।

## कठिनपदार्थः

जनिम् - जन्म, तिरश्चकार - तिरस्कृतवान्, लिपिकारः - कायस्थः, भण्डारी- कोशाधिकारि, समजनि - जातः/उत्पन्नः

## अभ्यासः

### १. एकवाक्येन उत्तरं लिखत।

१. मादरसमादलाम्बिकयोः पुत्रः कः?

२. नागालाम्बिका का?

३. बसवेश्वरस्य गुरुः कः?

४. बिज्जलमहाराजः कः?

५. शून्यपीठस्य अध्यक्षः कः आसीत्?

### २. रिक्तस्थानानि पूरयत।

१. बसवेश्वरः ________________ ग्रामे अजायत।

२. मोक्षसाधनार्थं गृहं त्यक्त्वा ________________ गतवान्।

३. लिङ्गजातिभेदं विना सर्वेषामपि ________________ अयच्छत्।

© KTBS NOT TO BE REPUBLISHED

४. आचारः एव धर्मः ____________________।

५. अनाचारः एव ____________________।

## ३. संयोज्य सन्धिनाम लिखत।

१. जनन + अनन्तरम् = ____________________।

२. यज्ञ + उपवीतम् = ____________________।

३. बसव + ईश्वरः = ____________________।

४. अत्र+ एव = ____________________।

५. सत्य + उक्तिः = ____________________।

## ४. वाक्यं रचयत।

१. विराजते  २. आसीत्  ३. गतवान्  ४. रचितवान्

## ५. समानार्थकं पदं लिखत।

१. मन्त्री  २. विवाहः  ३. कर्णः  ४. नेत्रम्

## ६. विरुद्धार्थकं पदं लिखत।

१. अनेक  २. साम्प्रादायिकः  ३. तीक्ष्णमतिः ४. तिरश्चकार

## ७. पञ्चषैः वाक्यैः कर्नाटकभाषया आङ्ग्लभाषया वा उत्तरं लिखत।

१. बसवेश्वरः किमर्थं गृहं त्यक्तवान्?

२. बसवेश्वरः कल्याणनगरे किं कृतवान्?

*.*.*.*

© KTBS NOT TO BE REPUBLISHED

# त्रयोदशः पाठः

शब्दज्ञानम्

## सुबन्तप्रकरणम् – 2

### ६. दकारान्तः पुलिङ्गः तद् शब्दः - ಅವನು

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | सः | तौ | ते |
| द्वितीया | तम् | तौ | तान् |
| तृतीया | तेन | ताभ्याम् | तैः |
| चतुर्थी | तस्मै | ताभ्याम् | तेभ्यः |
| पञ्चमी | तस्मात् | ताभ्याम् | तेभ्यः |
| षष्ठी | तस्य | तयोः | तेषाम् |
| सप्तमी | तस्मिन् | तयोः | तेषु |

NOT TO BE REPUBLISHED ©KTBS

### ७. दकारान्तः स्त्रीलिङ्गः तद् शब्दः - ಅವಳು

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | सा | ते | ताः |
| द्वितीया | ताम् | ते | ताः |
| तृतीया | तया | ताभ्याम् | ताभिः |
| चतुर्थी | तस्यै | ताभ्याम् | ताभ्यः |
| पञ्चमी | तस्याः | ताभ्याम् | ताभ्यः |
| षष्ठी | तस्याः | तयोः | तासाम् |
| सप्तमी | तस्याम् | तयोः | तासु |

## ८. दकारान्तः नपुंसकलिङ्गः तद् शब्दः - ಅದು

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | तत् | ते | तानि |
| द्वितीया | तत् | ते | तानि |

शेषं पुंलिङ्गवत्

## ९. दकारान्तः पुलिङ्गः एतद् शब्दः - ಇವನು

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | एषः | एतौ | एते |
| द्वितीया | एतम्/एनम् | एतौ/एनौ | एतान्/एनान् |
| तृतीया | एतेन/एनेन | एताभ्याम् | एतैः |
| चतुर्थी | एतस्मै | एताभ्याम् | एतेभ्यः |
| पञ्चमी | एतस्मात् | एताभ्याम् | एतेभ्यः |
| षष्ठी | एतस्य | एतयोः/एनयोः | एतेषाम् |
| सप्तमी | एतस्मिन् | एतयोः/एनयोः | एतेषु |

## १०. दकारान्तः स्त्रीलिङ्गः एतद् शब्दः - ಇವಳು

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | एषा | एते | एताः |
| द्वितीया | एताम्/एनाम् | एते/एने | एताः/एनाः |
| तृतीया | एतया/एनया | एताभ्याम् | एताभिः |
| चतुर्थी | एतस्यै | एताभ्याम् | एताभ्यः |
| पञ्चमी | एतस्याः | एताभ्याम् | एताभ्यः |
| षष्ठी | एतस्याः | एतयोः/एनयोः | एतासाम् |
| सप्तमी | एतस्याम् | एतयोः/एनयोः | एतासु |

NOT TO BE REPUBLISHED @KTBS

## ११. दकारान्तः नपुंसकलिङ्गः एतद् शब्दः - ಇದು

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | एतत् | एते | एतानि |
| द्वितीया | एतत् | एते | एतानि |

शेषं पुंलिङ्गवत्

## १२. दकारान्तः त्रिषुलिङ्गेषु समानः अस्मद् शब्दः - ನಾನು

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | अहम् | आवाम् | वयम् |
| द्वितीया | माम्,मा | आवाम्, नौ | अस्मान्, नः |
| तृतीया | मया | आवाभ्याम् | अस्माभिः |
| चतुर्थी | मह्यम्, मे | आवाभ्याम्,नौ | अस्मभ्यम्,नः |
| पञ्चमी | मत् | आवाभ्याम् | अस्मत् |
| षष्ठी | मम, मे | आवयोः, नौ | अस्माकम्,नः |
| सप्तमी | मयि | आवयोः | अस्मासु |

## १३. दकारान्तः त्रिषुलिङ्गेषु समानः युष्मद् शब्दः - ನೀನು

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | त्वम् | युवाम् | यूयम् |
| द्वितीया | त्वाम्, त्वा | युवाम्, वाम् | युष्मान्, वः |
| तृतीया | त्वया | युवाभ्याम् | युष्माभिः |
| चतुर्थी | तुभ्यं, ते | युवाभ्याम्/वाम् | युष्मभ्यं, वः |
| पञ्चमी | त्वत् | युवाभ्याम् | युष्मत् |
| षष्ठी | तव, ते | युवयोः, वाम् | युष्माकम्,वः |
| सप्तमी | त्वयि | युवयोः | युष्मासु |

@KTBS NOT TO BE REPUBLISHED

# चतुर्दशः पाठः

## सन्धिप्रकरणम्

उच्चारणसमये वर्णानाम् अत्यन्तं सामीप्यं संहिता। यत्र संहिता भवति तत्त क्वचित् वर्णव्यत्ययः भवति। अयमेव सन्धिः।

**सन्धयः त्रिविधाः** → अच्सन्धिः (स्वरसन्धिः)
→ हल्सन्धिः (व्यञ्जनसन्धिः)
→ विसर्गसन्धिः

### अच्सन्धिः (स्वरसन्धिः)

यत्र संहितायां स्वरस्य स्वरयोः वा व्यत्ययः भवति सः स्वरसन्धिः इति कथ्यते। स च वस्तुतः अष्टविधः भवति तेषु प्राधान्येन त्रयाणामेव सोदाहरणम् निरूपणम् अत्र क्रियते।

**एतेषां नामानि :–** १. सवर्णदीर्घसन्धिः २. गुणसन्धिः ३. वृद्धिसन्धिः

**सन्धिनियमाः**

**१. सवर्णदीर्घसन्धिः**

अ, आ, इ, ई, उ, ऊ, ऋ, ॠइत्येतेभ्यः वर्णेभ्यः तत्सवर्णेषु वर्णेषु परेषु पूर्वपरयोः स्थाने तत्तद्दीर्घः एकादेशः भवति।

**सवर्णवर्णाः** – अ आ इ ई उ ऊ ऋ ॠ

**सवर्णानां दीर्घाः** – आ ई ऊ ॠ

**यथा -**

| | | | | |
|---|---|---|---|---|
| अ + अ | → | आ | → मुर + अरिः | = मुरारिः। |
| आ + आ | → | आ | → विद्या + आलयः | = विद्यालयः। |
| इ + इ | → | ई | → कवि + इन्द्रः | = कवीन्द्रः। |
| ई + ई | → | ई | → लक्ष्मी + ईशः | = लक्ष्मीशः। |

@KTBS NOT TO BE REPUBLISHED

उ + उ → ऊ → सु + उक्तिः = सूक्तिः।
ऊ + ऊ → ऊ → भू + ऊर्ध्वम् = भूर्ध्वम्।
ऋ + ऋ → ॠ → मातृ + ऋणम् = मातॄणम्।

## २. गुणसन्धिः

ए, ओ, अर् इत्येतेषाम् गुणः इति नाम।

अ, आ इत्येताभ्याम् इ ई इत्येतयोः परयोः ए कारः,

उ ऊ परयोः ओ कारः, ऋ, ॠ परयोः अर् इति पूर्वपरयोः स्थाने एकादेशः भवति। तथा-

अ / आ →

| | | | | |
|---|---|---|---|---|
| इ - ई | → ए → | धर्म + इन्द्रः | = | धर्मेन्द्रः |
| | | गण + ईशः | = | गणेशः |
| उ - ऊ | → ओ → | नर + उत्तमः | = | नरोत्तमः |
| | | जल+ऊर्मिः | = | जलोर्मिः |
| ऋ - ॠ | → अर् → | देव+ ऋषिः | = | देवर्षिः |
| | | वर्षा+ऋतुः | = | वर्षर्तुः। |

## ३. वृद्धिसन्धिः

ऐ, औ, [आर्] इत्येषां वृद्धिः इति नाम। अ, आ इत्येताभ्यां वर्णाभ्याम् ए, ऐ इत्येतयोः परयोः ऐ कारः, ओ, औ परयोः औ कारः, [ऋ, ॠ परयोः आर्] इति च पूर्वपरयोः स्थाने एकादशः भवति। यथा

अ / आ →

| | | | | |
|---|---|---|---|---|
| ए - ऐ | → ऐ → | तव+ एव | = | तवैव |
| | | मत+ ऐक्यम् | = | मतैक्यम् |
| ओ - औ | → औ → | जल + ओघः | = | जलौघः |
| | | वन+औषधम् | = | वनौषधम् |
| ऋ - ॠ | → आर् → | कम्बल+ ऋणम् | = | कम्बलार्णम् |

@KTBS NOT TO BE REPUBLISHED

४. **यण्सन्धिः** = प्रति + एकम् = प्रत्येकम्।
मधु + अरिः = मध्वरिः।
पितृ + इच्छा = पित्रिच्छा।

५. **पूर्वरुपसन्धिः**
अन्ते + अपि = अन्तेऽपि।
सो + अयम् = सोऽयम्।

**अभ्यासः**

**१. सन्धिं विभज्य सन्धिनाम लिखत।**
१. विद्यालयः २. गङ्गोदकम् ३. तेनैव ४. वनौषधम्

**२. सन्धिं कृत्वा नाम लिखत।**
१. चन्द्र+उदयः २. लघु+उपहारः ३. एक+एकम् ४. सप्त+ऋषिः

**३. वाक्यं पठित्वा रेखाङ्कितानां शब्दानां सन्धिनामानि सूचयत।**
१. श्रीरामः **पुरुषोत्तमः** इति ख्यातः ।
२. अहं **देवालयं** गच्छामि।
३. **परोपकाराय** सतां विभूतयः।
४. विश्वामित्रः **महर्षिः** आसीत्।

NOT TO BE REPUBLISHED ©KTBS

**छात्राभ्यासः**

**अद्य - श्वः - ह्यः शब्दानां प्रयोगः**

**उदाहरणम्**

ह्यः ← अद्य → श्वः
↓ ↓ ↓
भानुवासरः सोमवासरः मङ्गलवासरः

अभ्यासः ह्यः अद्य श्वः

________ बुधवासरः ________

________ शुक्रवासरः________

# पञ्चदशः पाठः

## सुभाषितानि

**(कण्ठपाठः करणीयः)**

**पिठिका :** सुष्ठु भाषितम् सुभाषितम् । तस्य सूक्तिः, सदुक्तिः, सुवचनम्, इति नामान्तरमस्ति। सुभाषितानि अस्मान् नीतिं व्यवहारचातुर्यं च बोधयन्ति। मानवाः सुभाषितानां अध्ययनेन विवेकिनः भवन्ति। वेद, पुराण, नाटक – रामायण महाभारतादि काव्येषु बहूनि सुभाषितानि लभ्यन्ते। ततः कानिचित् अत्र चितानि।

१. संसारविषवृक्षस्य द्वे फले ह्यमृतोपमे।
सुभाषितरसास्वादः सङ्गतिः सुजनैः सह।।

२. प्रियावाक्य प्रदानेन सर्वे तुष्यन्ति जन्तवः।
तस्मात्तदेव वक्तव्यं वचने का दरिद्रता।

३. क्षणशः कणशश्चैव विद्यामर्थं च साधयेत्।
क्षणत्यागे कुतो विद्या कणत्यागे कुतो धनम्।।

४. यौवनं धनसम्पत्तिः प्रभुत्वमविवेकिता।
एकैकमप्यनर्थाय किमु यत्र चतुष्टयम्।।

५. शतेषु जायते शूरः सहस्त्रेषु च पण्डितः।
वक्ता दश सहस्त्रेषु दाता भवति वा न वा।।

©KTBS NOT TO BE REPUBLISHED

६. छायामन्यस्य यच्छन्ति तिष्ठन्ति स्वयमातपे।
फलान्यपि परार्थाय वृक्षा सत्पुरुषा इव।।

७. यथा धेनुसहस्त्रेषु वत्सो विन्दति मातरम्।
तथा पुराकृतं कर्म कर्तारमनुगच्छति।।

## कठिनशब्दार्थाः

सङ्गतिः=सहवासः, तुष्यन्ति=सन्तोषं अनुभवन्ति, प्रभुत्वं=अधिकारः, वक्ता=उपदेशकः, दाता=दानी, आतपः=सूर्यप्रकाशः वत्सः=अर्भकः, विन्दति=लभते।

## अन्वयार्थाः

१. संसार इति विषपृक्षस्य द्वे अमृतोपमे फले → एकं – सुभाषितरसास्वादः; द्वितीयं– सज्जनैः सह सहवासः

२. प्रियवाक्येन – सर्वे जन्तवः सन्तोषम् अनुभवन्ति।
अतः प्रियवाक्यमेव वक्तयं–वचने दरिद्रता का?

३. क्षेणेन विद्यां, कणेन अर्थं } साधयेयुः
क्षणमपि, कणमपि } त्यागं न करणीयम्

४. यौवनम्, धनसम्पत्तिः, प्रभुत्वम्, अविवेकता } एकैकम् अनर्थाय अस्ति। यत्र चतुष्टयम् किम्?

@KTBS
NOT TO BE REPUBLISHED

५. शतजनेषु – शूरः –
सहस्त्र जनेषु – पण्डितः– } जायते। किन्तु दानी भवति वा न भवति।
दशसहस्त्र जनेषु – वक्ता

६. वृक्षाः स्वयं सूर्यप्रकाशे स्थित्वा
अन्येषां छायां यच्छन्ति।
स्वेषां फलानि अपि परार्थाय ददति।
तथैव सत्पुरुषाणां अपि कार्याणि
परार्थाय सन्ति इति भावः।

७. सहस्त्रेषु धेनुषु सतीष्वपि वत्सः स्वमातरमेव अवाप्नोति।
तथैव पुराकृतं कर्म कर्तारमेव अनुगच्छति।

@KTBS NOT TO BE REPUBLISHED

## अभ्यासः

### १. मौखिकप्रश्नाः

१. सुभाषितस्य अर्थः कः?
२. शतेषु कः जायते?
३. वृक्षाः के इव सन्ति?
४. सुभाषितानि कुत्र लभ्यन्ते?

### २. एकवाक्येन उत्तरं लिखत।

१. केन जन्तवः तुष्यन्ति।
२. संसारविषवृक्षस्य अमृतोपमे फले के?
३. स्वयं आतपे के तिष्ठन्ति?
४. पुराकृतं पुण्यं कं अनुगच्छति?
५. कति जनेषु पण्डितः जायते?

## ३. रिक्तस्थानानि पूरयत।

१. सुभाषितस्य नामान्तरम् ______________।
२. वचने का ______________।
३. न तत्र ______________।
४. पुराकृतं कर्तारमनुगच्छति ______________।

## ४. लकार पुरुष वचनानि लिखत।

१. तुष्यन्ति  २. जायते  ३. गच्छति

## ५. लिङ्ग विभक्ति वचनानि लिखत।

१. वृक्षस्य  २. वचने  ३.जन्तवः  ४. मातरम्

## ६. विरुद्धार्थकपदं लिखत।

१. प्रियः  २. परार्थः  ३. जायते  ४. अविवेकिता

## ७. संयोज्य लिखत।

| अ | | आ |
|---|---|---|
| १. सदुक्तिः | – | लट् लकारः |
| २. वत्सः | – | अनर्थाय |
| ३. एकैकम् | – | सुभाषितम् |
| ४. यौवनम् | – | वृद्धि सन्धिः |
| ५. तिष्ठन्ति | – | अर्भकः |

@KTBS NOT TO BE REPUBLISHED

## ८. उत्तरं लिखत

१. सुभाषितानां प्रयोजनं किम् ?

२. वृक्षाः सत्पुरुषा इव – कथम् ?

### अवगच्छत

**सुभाषितग्रन्थाः - तथा रचनाकाराश्च।**

| | | |
|---|---|---|
| १. सुभाषितत्रिशती | – | भर्तृहरिः |
| २. सुभाषितरत्नभाण्डागारः | – | काशीनाथशर्मा |
| ३. सूक्तिमुक्तावली | – | राजशेखरः |
| ४. सदुक्तिकर्णामृतम् | – | श्रीधरदासः |
| ५. शार्ङ्गधरपद्धतिः | – | शार्ङ्गधरः |

**धात्राभ्यासः -** भर्तृहरेः नीतिशतकं पठत।

**Weblink:** http://www.ancientliterature.com

*.*.*.*

@KTBS NOT TO BE REPUBLISHED

## षोडशः पाठः

सप्तमीविभक्तिः

# आधुनिकः संस्कृतकविः डा।। सि.जि. श्रीपुरुषोत्तमवर्यः



**पिठिका :** संस्कृतसाहित्यं विपुलम् अगाधं च अस्ति। नैके कवयः अस्य साहित्यस्य सौन्दर्यम् आस्वाद्य यथाशक्ति पद्य-गद्य-रूपेण लोकार्पणं कृतवन्तः। अस्मिन् कार्ये न केवलं प्राचीनाः अपि तु अर्वाचीनाः अपि कवयः सन्ति, ये स्वयोगदानम् अनेकप्रकारेण दत्तवन्तः। तादृशेषु अर्वाचीनकविषु डा.सि.जि. पुरुषोत्तमवर्यः अपि अन्यतमः। अस्य कवेः जीवनं, विद्याविषये परिश्रमं च अवगत्य छात्राः प्रेरणां प्राप्नुवन्तु इति मनसि अवधार्य अयं पाठः अत्र सुनिहितः अस्ति।

© KTBS NOT TO BE REPUBLISHED

अधुनिक-संस्कृत-**कविषु** डा.सि.(चुञ्चनकट्टे) जि,.(गुरुकुल) पुरुषोत्तमवर्यः अन्यतमः। अस्य जन्म १९२३ तमे **वर्षे** चुञ्चनकट्टे नाम **क्षेत्रे** एकस्मिन् **दरिद्रकृषकपरिवारे** अभवत्। पिता अस्य शिशोः पुट्टय्य इति नाम अकरोत्। शिशोः तृतीय एव वयसि, तस्य मातापितरौ प्लेग् रोगेण पीडितौ दिवङ्गतौ। अस्य शिशोः बन्धुषु अन्यतमः दयया इमं तत्रैव विद्यमानम् अनाथशिशूनां गुरुकुलं नीत्वा तत्र रक्षण-भरण-पोषण-शिक्षणादिव्यवस्थाम-करोत्। गुरुकुले स्थितः उत्तरभारतीयः हरिद्वारक्षेत्रीयः धर्मदेव-वाचस्पतिः नाम गुरुः अस्य बालकस्य पुरुषोत्तमः इति नामकरणम् अकरोत्। श्रीपुरुषोत्तमः **गुरुकुले** हिन्दीभाषायाः संस्कृतभाषायाः च अध्ययनं श्रद्धया अकरोत्।

**चुञ्चनकट्टे-क्षेत्रे** प्राथमिक–विद्याभ्यासं परिसमाप्य पुरुषोत्तमः **कृष्णराजसागरे** प्रौढशाला–शिक्षणं कृत्वा **दशमकक्ष्यां प्रथमश्रेण्याम्** उत्तीर्णः अभवत्। **महिषपुर्याम्** (मौसूरु क्षेत्रे) इन्टर्मीडियेट् परिक्षां परिसमाप्य मैसूरु–विश्वविद्यालयतः बि.ए. (Hons.) इति पदवीं प्राप्य **संस्कृते स्नातकोत्तरशिक्षणे** प्रथमं स्थानं, सुवर्णपदकं च प्राप्तवान्। एषः महाभागः **मैसूरु-विश्वविद्यालये** एव ३५ (पञ्चत्रिंशत्) वर्षाणि यावत् अनेकान् छात्रान् संस्कृतम् अध्यापयत्।

**संस्कृतसाहित्ये** नवछन्दसः प्रवर्तकः इत्येव ख्यातः श्रीपुरुषोत्तमः। अनेन महाभागेन काव्य–तरङ्गिण्याः भागद्वयेऽपि मूलकन्नड छन्दसि विद्यमानाः कविताः तस्मिन् एव छन्दसि **संस्कृते** अनूदिताः सन्ति। एषः महाभागः न केवलं स्वतन्त्रतया कवितानां रचने समर्थः अपि तु **अनुवादकरणे** अपि सिद्धहस्तः । अस्य कृतिषु सर्वज्ञवचनानि, श्रीरामायणदर्शनं इति कृतिद्वयं प्रसिद्धम्। अनेन महाभागेन संस्कृत छन्दसि विश्वनाथसुप्रभातस्तोत्रम् विरचितम् अस्ति। अमेरिका देशस्य मिचिगन् राज्यस्य प्लिन्ट् पत्तने विद्यमानस्य विश्वनाथदेवालयस्य विश्वनाथ देवम् अधिकृत्य रचितम् एतत् सुप्रभातम् इदानीमपि प्रतिदिनं प्रातः काले भक्ताः श्रद्धया गायन्ति।

कर्नाटक संस्कृत विश्वविद्यालयतः गौरवडाक्टरेट् –पदवीप्रदानेन सम्मानितः, संस्कृतः, सरलः, **शिष्यसमूहे** लब्धकीर्तिः च एषः महाभागः अधुना निवृत्तोऽपि श्रद्धया आगतेभ्यः विद्यार्थिभ्यः अद्यापि संस्कृतं बोधयन् अस्ति। क्रियासिद्धिः सत्वे भवति महतां **नोपकरणे** इति **दण्डिकवेः उक्तिः अस्मिन् अन्वर्था** विराजते।

NOT TO BE REPUBLISHED ©KTBS

**कठिणपदार्थः** – विपुलम् – enormous, अगाधम् – very deep, नैके – many, योगदानम् – contribution, अवगत्य – having known, नीत्वा – having taken, भरणम् – taking care, श्रद्धया – with interest/faith, छन्दः – prosody/meter, ख्यातः – famous, अनूदिताः – translated, लब्धकीर्तिः – famous, नोपकरणे – no external agency, उक्तिः – saying, अन्वर्था – true to its meaning.

## अभ्यासः

### १-अ) एतेषां प्रश्नानाम् उत्तरम् एकवाक्येन लिखत।

१. संस्कृतसाहित्यं कीदृशम् अस्ति? ________________

२. पुरुषोत्तमवर्यस्य जन्म कुत्र अभवत्? ________________

३. शिशोः पित्रा दत्तं नाम किम्? ________________

४. पुरुषोत्तमवर्यस्य प्राथमिक-विद्याभ्यासः कुत्र अभवत्?

________________

५. पुरुषोत्तमः गुरुकुले कस्याः च अध्ययनम् अकरोत्?

________________

६. कः पुरुषोत्तमस्य नामकरणम् अकरोत्? ________________

### आ) मौखिकप्रश्नाः

१. पुरुषोत्तमः संस्कृतसाहित्ये कस्य प्रवर्तकः इत्येव ख्यातः?

________________

२. पुरुषोत्तमवर्येण अनूदितं कृतिद्वयं किम्? ________________

६. महतां क्रियासिद्धिः कस्मिन् भवति कुत्र च न भवति?

________________

©KTBS NOT TO BE REPUBLISHED

**२. एतेषां पर्यायपदानि लिखत।**

१. पिता  २. माता  ३.गुरुः  ४. ख्यातः  ५. विद्यार्थी

**३. एतेषां विरुद्धपदानि लिखत।**

१. दरिद्रः  २. दया  ३. उत्तीर्णः  ४. प्राचीनाः

**४. एतेषां सन्धिं/विभजनं वा कुरुत।**

१. न+एके=____________  २. पुरुषोत्तमः= ______ + ______

२. तत्र+एव=____________  ४. इत्येव = ______ + ______

५. निवृत्तो+अपि=____________  ६. अद्यापि = ______ + ______

**अवधेयांशाः**

**प्रकृति - प्रत्यय - विभागं/संयोगं वा कुरुत।**

१. आ + स्वाद् + ल्यप् = ____________

२. अव + गम् + ल्यप् = ____________

३. अव + धृ + ल्यप् = ____________

४. नी + क्त्वा = ____________

५. कृत्वा = ____________ + ____________

६. परिसमाप्य = __________ + __________ + आप् +______

NOT TO BE REPUBLISHED @KTBS

**संयोज्य लिखत**

| अ | आ |
|---|---|
| १. विपुलम् | धर्मदेववाचस्पतिः |
| २. उत्तरभारतीयः | चुञ्चनकट्टे नाम क्षेत्रम् |
| ३. ख्यातः | संस्कृतसाहित्यम् |
| ४. गुरुकुलम् | पुरुषोत्तमवर्यः |

*** श्रीपुरुषोत्तमवर्येण रचितानि कानिचन पुस्तकानि-**

१. अथर्ववेदः (१९५८) - (परिचयात्मकः)

२. काव्यतरङ्गिणी प्रथमो भागः (१९५९) (प्रसिद्धानां कन्नड - हिन्दी - कवितानां संस्कृतानुवादाः)

३. काव्यतरङ्गिणी द्वितीयो भागः (१९६७) (राष्ट्रकवि - कुवेम्पुवर्यस्य कवितानाम् अनुवादः, पुरुषोत्तमवर्येण रचितानां स्वतन्त्र - कवितानां च सङ्कलनम्)

४. राष्ट्रकवेः कुवेम्पुवर्यस्य श्रीरामायणदर्शनम् ग्रन्थस्य १५०० पङ्क्तीनां संस्कृते अनुवादः (१९७२)

५. आदि-चुञ्चनगिरि-सुप्रभात-स्तोत्रम् (१९७७) (अस्य ध्वनिमुद्रिका अपि लभ्यते)

६. राष्ट्रकवेः कुवेम्पुवर्यस्य नन्नगोपाल नाटकस्य अनुवादः मम गोपालः (१९९२)

©KTBS NOT TO BE REPUBLISHED

# सप्तदशः पाठः

क्रियापदज्ञानम्

## तिङन्तप्रकरणम्–2

### लङ्लकारः - पठ्धातुः - भूतकालः - परस्मैपदम्

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः | अपठत् | अपठताम् | अपठन् |
| मध्यमः | अपठः | असपठतम् | अपठत |
| उत्तमः | अपठम् | अपठाव | अपठाम |

एवम् – अभवत्, अलिखत्, अगच्छत्, अनमत्, अयच्छत्, अनृत्यत्, अपिबत्, अचोरयत् अताडयत् इत्यादयः

### लङ् लकारः - भूतकालः शोभ्धातुः आत्मनेपदम्

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः | अशोभत | अशोभेताम् | अशोभन्त |
| मध्यमः | अशोभथाः | अशोभेथाम् | अशोभध्वम् |
| उत्तमः | अशोभे | अशोभावहि | अशोभामहि |

एवं – अरोचत, अक्षोभत, अलोकत इत्यादयः

*.*.*.*

© KTBS NOT TO BE REPUBLISHED

# अष्टादशः पाठः

द्वितीयाविभक्तिः

## प्राचीनविज्ञानिनः





© KTBS NOT TO BE REPUBLISHED

**पिठिका :** मानवस्य सुखजीवनाय विज्ञानस्य योगदानम् अधिकम् अस्ति। विज्ञानस्य संशोधनेन आविष्कृतैः वस्तुभिः अस्माकं जीवनं श्रमरहितं सङ्कटरहितं च भवति। एतेषां नूतनानां वस्तूनां संशोधकाः एव विज्ञानिनः इति कथ्यन्ते।

अधुनिककालस्य विज्ञानिनां परिचयः सामान्यतः भवति। यथा अधुनिके युगे विज्ञानिनः वर्तन्ते तथा प्राचीनकाले अपि तपस्विजनाः, संशोधकाः, विज्ञानिनः च बहवः आसन्। तेषु केषाञ्चन विज्ञानिनां संक्षिप्तं परिचयं प्राप्नुमः।

(उद्देशः–प्राचीनविज्ञानिनां परिचयेन छात्राः प्रेरणां प्राप्य संशोधने उत्सुकाः भवेयुः।)

अस्माकं भारतदेशे प्राचीनकाले अनेके विज्ञानिनः विविधेषु विषयेषु **संशोधनम्** अकुर्वन्। बहूनां ग्रन्थानां **रचनम्** अपि अकुर्वन्। तेषु कणादः अन्यतमः। कणादमहर्षिः **वैशेषिकसूत्राणि** रचितवान्। तत्र जगत्कारणत्वादि – युक्तियुक्ताः विषयाः प्रतिपादिताः। ते विषयाः अद्यापि संशोधनयोग्याः सन्ति। एते विषयाः भौतशास्त्रसम्बन्धिनः सन्ति।

"रसरत्नसमुच्चयः" इति प्रसिद्धे ग्रन्थे लोहानां लोहरसानां **विवरणं** दत्तम्। तेषाम् उपयोगः अपि वर्णितः। एनं **ग्रन्थं** वाग्भटो नाम विज्ञानी अरचयत्। एषः प्रख्यातः विज्ञानी "अष्टाङ्गसङ्ग्रहः" इति तस्य अन्यस्मिन् ग्रन्थे **योगशास्त्रं** विलिख्य लोकोपकारम् अकरोत्।



'आर्यभटः' इति अन्यः प्रसिद्धः विज्ञानी 'आर्यभटीयम्' इति ग्रन्थम् अरचयत्। भास्कराचार्यस्य 'लीलावती' इति ग्रन्थः गणितशास्त्रे लोकप्रसिद्धः। 'वराहमिहिरः' इति सुविख्यातो विज्ञानी 'बृहत्संहिता' इति ग्रन्थं रचितवान्। एषः ग्रन्थः प्राचीनकालस्य "विश्वकोशः" इति प्रसिद्धः। अस्मिन् ग्रन्थे विविधशास्त्रसम्बद्धाः विषयाः दत्ताः। सुश्रुतमहर्षिः 'सुश्रुतसंहिता' इति **पुस्तकं** विलिख्य तत्र सुरूपशस्त्रचिकित्साविधानम् उक्तवान्। नागार्जुनः बालोपचारे महान् वैद्यः नूतनौषधानां संशोधकः आसीत्। एषः कर्णाटकीयः इति अस्माकम् अभिमानास्पदः विषयः। एवम् अनेके विज्ञानिनः ऋषयः अनेकेषु विषयेषु **संशोधनं** कृत्वा अनेकान् ग्रन्थान् रचिवन्तः। एतेषां सर्वेषां ग्रन्थाः संस्कृतभाषायाम् एव सन्ति।

एतादृशाः ग्रन्थाः अद्यापि अध्ययनयोग्याः, संशोधनयोग्याः च सन्ति। एतेषाम् अध्ययनेन अस्माकं पूर्वजाः विज्ञानक्षेत्रे कुशलाः सिद्धहस्ताः आसन् इति ज्ञायते। आधुनिकाः भारतीयाः अपि केचन विज्ञानिनः केचन ऋषिसदृशाः अपरे त्यागजीविनः भवन्तु इति आशास्महे।

©KTBS NOT TO BE REPUBLISHED

वि.सू – छात्राः शिक्षकाणां मार्गदर्शनेन भारतीय विज्ञानविषयेषु, ग्रन्थानां विषयेषु च अधिकं जानीयुः।

## शब्दार्थाः

योगदानम् – महत् प्रदानम् ಕೊಡುಗೆ Contribution

प्राप्नोति – (प्र + आप्नोति) लभते ಪಡೆಯುತ್ತಾನೆ/ಳೆ/ತ್ತದೆ Gets

सङ्क्षिप्तम् – लघुरूपम् ಸಂಕ್ಷಿಪ್ತವಾದ Precise

परमाणुः – अतिसूक्ष्मकणः ಅಣು Atom

युक्तियुक्ताः – ಮೆಚ್ಚುಗೆಯಿಂದ ಕೂಡಿದ

अग्रेसरः – नेता ಪ್ರಮುಖ ವ್ಯಕ್ತಿ Leader

बालोपचारः – शिशुनां शुश्रूषा ಮಕ್ಕಳ ಉಪಚಾರ Caring of children

## अभ्यासः

### १. मौखिकप्रश्नाः

१. अस्माकं जीवनं कैः श्रमरहितं सङ्कटरहितं च अस्ति?

२. प्राचीनकाले अपि विज्ञानिनः आसन् किम्?

३. भारतस्य प्राचीनविज्ञानिनां कानिचन नामानि वदत।

४. प्राचीनकालस्य विश्वकोशः इति कः ग्रन्थः प्रसिद्धः?

### २. एकेन वाक्येन उत्तराणि लिखत।

१. मानवस्य सुखजीवनाय कस्य योगदानम् अधिकम् अस्ति?

२. नूतनानां वस्तूनां संशोधकाः किमिति कथ्यन्ते?

३. भास्कराचार्यः कं ग्रन्थं रचितवान्?

४. 'बृहत्संहिता' इति ग्रन्थस्य लेखककः?

५. 'अष्टाङ्गसङ्ग्रहः' इति ग्रन्थे किं शास्त्रं लिखितम्?

@KTBS NOT TO BE REPUBLISHED

## ३. संयोज्य लिखत।

| | |
|---|---|
| १. कणादः | कर्णाटकीयः |
| २. वाग्भटः | आर्यभटीयम् |
| ३. आर्यभटः | लीलावती |
| ४. भास्कताचार्यः | सुखजीवनम् |
| ५. वराहमिहिरः | रसरत्नसमुच्चयः |
| ६. नागर्जुनः | वैशेषिकसूत्राणि |
| | बृहसंहिता |

## ४. समूहतः समानार्थकपदं चित्वा लिखत-

१. प्रसिद्धः  २. कुशलः  ३. पुस्तकम्  ४. विज्ञानी

(संशोधकः, ग्रन्थः, विख्यातः, बुद्धिमान्, निपुणः)

## ५. यथोदाहरणं वाक्यानि पूरयत।

उदा – विद्वान् पुस्तकम् अरचयत्।

विद्वान् पुस्तकम् रचितवान्।

१. मुनिः तपसा असाधयत्।

मुनिः तपसा ____________।

२. दरिद्रः धनम् अयाचत।

दरिद्रः धनं ____________ ।

३. बालकः पुष्पाणि अस्थापयत्।

बालकः पुष्पाणि ____________।

NOT TO BE REPUBLISHED @KTBS

४. विज्ञानी प्रयोगं अकरोत् ।

विज्ञानी प्रयोगं ________________।

५. कविः वृक्षम् अवर्णयत् ।

कविः वृक्षं ________________।

**६. विरुद्धार्थकपदानि लिखत।**

१. अस्ति  २. सुखम्  ३. नूतनम्  ४. आधुनिककालः

५. कुशलाः

**अवधेयांशाः**

**एतेषां लिङ्गं विभक्तिं वचनं च लिखत।**

१. मानवस्य  २. संशोधनेन  २. युगे

४. सत्राणि  ५. लोहानाम्  ६. ग्रन्थम्

NOT TO BE REPUBLISHED @KTBS

**यथोदाहरणं क्रियापदानां रूपाणि लिखत।**

| | | | |
|---|---|---|---|
| १. | पठति | पठतः | पठन्ति। |
| | लिखति | ________ | ________ |
| | रचयति | ________ | ________ |
| २. | भवसि | भवथः | भवथ |
| | पश्यसि | ________ | ________ |
| | वदसि | ________ | ________ |
| ३. | तिष्ठामि | तिष्ठावः | तिष्ठामः |
| | पूरयामि | ________ | ________ |
| | वर्णयामि | ________ | ________ |

## यथोदाहरणं विभक्तिरूपाणि लिखत।

| | | | |
|---|---|---|---|
| १. | बालकः | बालकौ | बालकाः । |
| | भास्करः | ________ | ________ |
| | मिहिरः | ________ | ________ |
| २. | ग्रन्थम् | ग्रन्थौ | ग्रन्थान् |
| | कालम् | ________ | ________ |
| | विषयम् | ________ | ________ |
| ३. | प्रयोगेन | प्रयोगाभ्याम् | प्रयोगैः |
| | पुस्तकेन | ________ | ________ |
| | चरकेण | ________ | ________ |

**Weblinks**

* http://www.anscient science.com
* http://www.charakasamhitha.com

©KTBS
NOT TO BE REPUBLISHED

# एकोनविंशः पाठः

तृतीयाविभक्तिः

## आजादः चन्द्रशेखरः



**पीठिका** – बहवः देशभक्ताः महापुरुषाः भारतदेशस्य स्वातन्त्र्यसम्पादनार्थं स्वीयं जीवितमेव समर्पितवन्तः। स्वातन्त्र्याय भारतीयाः आङ्ग्लविरोधि आन्दोलनं कुर्वन्त एव आसन् तेषु चन्द्रशेखर आजादमहाभागस्य जीवनचरितं देशभक्तिः सत्यतादिगुणाः अस्मिन् पाठे निरूपिताः।

१. चन्द्रशेखरः क्रि.श. षडुत्तर एकोनविंतिशततमे वर्षे जुलै मासस्य त्रयोविंशतितमे दिनाङ्के (२३.७.१९०६) मध्यप्रदेशस्य 'भावरा' नाम ग्रामे अजायत। अस्य पिता सीतारामतिवारिः माता च जगराणीदेवी। एषः बाल्ये एव वाराणसीं गत्वा संस्कृताध्ययनं कर्तुं प्रारभत। तस्मिन् समये सर्वत्र देशे आङ्ग्ल विरोधिकार्यणि प्रारभन्त। एषः अपि तस्मिन् भागी अभवत्।

२. संस्कृतस्य एव छात्रः चन्द्रशेखरः यदा एकादशवर्षदेशीयः आसीत् **अनेन**



NOT TO BE REPUBLISHED @KTBS

"जलियन्वाला" काण्डस्य नृशंसता श्रुता, तदैव **तेन** संकल्पितम् – **येन** केनापि प्रकारेण इदं क्रूरशासनम् उन्मूलनीयम् इति।

३. शीघ्रमेव सः कालः आयातः। भारते ब्रिटीष्युवराजः आगच्छत्। प्रशासनेन तस्य स्वागताय यद् आयोजनं कृतं तस्य बहिष्काराय देशवासिभिः निश्चयः कृतः।वाराणस्यां 'क्वीन्स् कालेज्' इति नाम्ना ख्यातस्य संस्कृतमहाविद्यालयस्य प्राङ्गणे आयोजिते बहिष्कार-कार्यक्रमे अन्दोलनं कुर्वाणः आजादः आरक्षकैः गृहीतः।

न्यायाधीशः – तव नाम किम्?

चन्द्रशेखरः – 'आजादः'।

न्यायाधीशः – कस्तव पिता?

चन्द्रशेखरः – 'स्वाभिमानः'।

न्यायाधीशः – क्व निवासस्थानम्?

चन्द्रशेखरः – 'कारागारः'

न्यायाधीशः **तथाविधोत्तरदानेन** तं उद्दण्डं ज्ञात्वा क्रूरं दण्डं श्रावयन् अवदत् – 'पञ्चदशवारं **वेत्रदण्डेन** एनं ताडयित्वा कारागारान्निष्कासय' इति।

४. सः प्रतिवेत्रघातम् – 'महात्मा गान्धी विजयताम्', 'भारत-माता जयतु', 'ब्रिटीश्



NOT TO BE REPUBLISHED © KTBS

शासनं नश्यतु' इति घोषं तावत्पर्यन्तम् अकरोत् यावत् किल मूर्च्छितो नाभवत्।



५. षोडशे वयसि आजादः भारतीयगणराज्यसेनां प्राविशत्। अस्याः नायकस्य रामप्रसाद बिस्मिल्लस्य मरणानन्तरम् एषः सेनायाः नायकः अभवत्। भगत्सिंहः अस्य सहायकः आसीत्।

६. लालालजपतरायः 'सैमन्' नामकस्य समितेः विरुद्धम् अन्दोलनं कृत्वा **आरक्षकैः** गृहीतः मृतः च। तस्य प्रतिरोधाय प्रवृत्ताः – आजादः, भगतसिंहः, शिवरामः, राजगुरुः जयगोपालश्च – इमे सर्वे स्काट् नामानं लालालजपतरायस्य मृत्योः मुख्यहेतुभूतं हतवन्तः। अतः आरक्षकाः एनं गृहीतुं प्रयत्नं कृतवन्तः।

७. आजादः एकत्रिंशदुत्तरनवदशशततमे (१९३१) वर्षे फरवरी मासस्य सप्तविंशे दिनाङ्के पूर्वाह्णे दशवादनसमये – प्रयागस्य 'आल्फ्रेड्' वाटिकायां **सुखदेवराजेन** सह उपविशन् नाट्बावर् तथा अन्यैः आरक्षक–सहचरैश्च सर्वतः सहसा आक्रान्तः। एकत्र एकाकी आजादः, अन्यत्र बहवः शत्रवः। घण्टैकं यावत् उभयतः गुटिकावृष्टिः सञ्जाता। यदा गुटिकाः समाप्तप्रायाः अभवन् तदा, अजादः **अन्तिमया गुटिकया** आत्मानं हत्वा स्वीयं 'आजाद' इति नाम सार्थकं कृतवान्। स्वप्राणान् हुतवान् स्वातन्त्र्य–यज्ञकुण्डे वीरगतिं च प्राप्तवान्।

@KTBS NOT TO BE REPUBLISHED

**कठिनशब्दार्थः** - नृशंसता=क्रूरता, उन्मूलनम्=निवारणम्, प्राङ्गणम्=आवरणम्, वेत्रदण्डः=वंशवृक्षस्य दण्डः, वाटिका=उद्यानवनम्, आरक्षकः=राजभटः, सहसा=तत्क्षणम्, गुटिका=गोलिका.

**कोशपाठः**

१. पिता - तातस्तु जनकः पिता।

२. सेना - ध्वजिनी वाहिनी सेना पृतनाऽनीकिनी चमूः।

३. वाटिका - (अमात्यगणिका गेहोपवने) वृक्षवाटिका।

४. शत्रुः - रिपौ वैरि सपनत्नारि द्विषद्वेषण दुर्हृदः।

५. माता - जनयित्री प्रसूर्माता जननी।

६. छात्राः - छात्रान्तेवासिनौ शिष्ये शैक्षाः प्राथमकल्पिकाः।

७. आलयः - निशान्तवस्त्यसदन भवनागार मन्दिरम्।

**सह शब्दप्रयोगः**

वाक्ये यदि सह इत्यस्य पदस्य प्रयोगः क्रियते तर्हि तत्सम्बद्धं पदं तृतीयाविभक्त्यन्तं भवति एवमेव सार्धं, साकं समम् इत्येतेषां प्रयोगेऽपि। उदा जनकेन सह/सार्धं/साकं/समं पुत्रः - गच्छति।

**Weblinks**: www.freedom fighter of India.com

**१. मौखिकप्रश्नाः।**

१. चन्द्रशेखर आजादः कुत्र अजायत?

२. बाल्ये आजादःकस्मिन् नगरे अध्ययनं कृतवान्?

३. आजादः कैः गृहीतः?

@KTBS NOT TO BE REPUBLISHED

४. भारतीयगणराज्यसेनाम् आजादः कदा प्राविशत्?

५. आल्फ्रेड वाटिका कुत्र कर्तते?

## २. एकवाक्येन उत्तरं लिखत।

१. चन्द्रशेखर आजादस्य माता पितरौ कौ?

२. चन्द्रशेखरः वाराणस्यां किम् अध्ययनं कर्तुं प्रारभत?

३. संस्कृतमहाविद्यालयस्य नाम किम्?

४. चन्द्रशेखरः न्यायालये स्वस्य नाम किमुक्तवान्?

५. भारतीयगणराज्यसेनायाः नायकः कः आसीत्?

६. भगतसिंहः कस्य सहायकः आसीत्?

७. आजादः कं व्यापादितवान्?

## ३. रिक्तस्थानं पूरयत।

१. अनेन ____________ काण्डस्य नृशंसता श्रुता।

२. ____________ विजयताम्।

३. ____________ उद्याने आरक्षकैः गृहीतः।

४. स्वीयं ____________ नाम च सार्थकम् अकरोत्।

५. ततः प्रभृति चन्द्रशेखरः ____________ इति प्रथितः।

## ४. समानार्थकपदं लिखत।

१. पिता २. छात्रः ३. वाटिका ४. आरक्षकः ५. माता

## ५. विरुद्धार्थकपदं लिखत।

१. पूर्वाह्णः २. शत्रुः ३. सार्थकम् ४. स्वातन्त्र्यम्

@KTBS NOT TO BE REPUBLISHED

## ६. सन्धिं विभज्य नाम लिखत।

१. मरणानन्तरम्  २. विद्यालयः ३. घण्टैकम् ४. तथाविधोत्तरम्

## ७. अन्यलिङ्गरूपं लिखत।

१. माता  २. नायकः  ३. देवः  ४. ख्यातः ५. छात्रः

## ८. संयोज्य लिखत।

| | अ | | आ |
|---|---|---|---|
| १. | आजादः | १. | नगरी |
| २. | वाराणसी | २. | सरंस्कृतस्य छात्रः |
| ३. | संस्कृतमहविद्यालयः | ३. | नश्यतु |
| ४. | ब्रिटिश्शासनम् | ४. | क्वीन्स्कालेज् |
| ५. | साण्डर्स | ५. | युवराजः |
| | | ६. | अधिकारी |

@KTBS NOT TO BE REPUBLISHED

## योग्यता विस्तारः

श्लोकमिमं पठत।

जगराणी प्रसूर्धन्या सीतारामः पिता तथा।
धन्यश्च भावराग्रामः पुण्यौ काशीप्रयागकौ।।

*.*.*.*

# विंशतः पाठः

**श्लेषार्थग्रहणम्**

## चाटुश्लोकाः

**पीठिका** – संस्कृतश्लोकसाहित्यं बहुविशालम्, अद्भुतं, रोचकं च विद्यते। तत्र सुभाषितश्लोकाः, स्तुतिश्लोकाः, तत्त्वबोधश्लोकाः, समस्यापूर्णश्लोकाः इत्यादयः अनेके विधाः सन्ति। तेषु समस्यापूर्णश्लोकाः चाटुश्लोकाः वा मनसः रञ्जनार्थं ज्ञानवर्धनार्थं प्रसिद्धाः। कवयः स्वेषु ग्रन्थेषु तत्र तत्र चाटुश्लोकान् रचितवन्तः। एतादृशश्लोकानां पृथक् ग्रन्थः कुत्रापि न दृश्यते। केचन श्लोकाः कर्णाकर्णिद्वारा आगताः। अत्र केचन श्लोकाः छात्राणां कृते परिचायनार्थं दत्ताः।

**उद्देशः** – श्लोकसाहित्यप्रकारविशेषस्य परिचयः। श्लोकरचनाकौशलस्य परिचयः।

कस्तूरी जायते कस्मात्? को हन्ति करिणां कुलम्?  
किं कुर्यात् कातरो युद्धे? मृगात् सिंहः पलायते ॥१॥

भोजनान्ते च किं पथ्यम्? जयन्तः कस्य वै सुतः?  
कथं विष्णुपदं प्रोक्तम्? तक्रं शक्रस्य दुर्लभम् ॥२॥

केशवं पतितं दृष्ट्वा पाण्डवाः हर्षनिर्भराः।  
रुदन्ति कौरवाः सर्वे हा हा केशव केशव॥३॥

सीमन्तिनीषु का शान्ता? राजाभूत् को गुणोत्तमः?  
विद्वद्भिः का सदा वन्द्या? अत्रैवोक्तं न बुद्ध्यते॥४॥

जम्बूफलानि पक्वानि पतन्ति विमले जले।  
कपिकम्पितशाखाभ्यः गुळु गुग्गुळु गुग्गुळु॥५॥

राज्याभिषेके मदविह्वलायाः  
हस्ताच्च्युतो हेमघटस्तरुण्याः।  
सोपानमासाद्य करोति शब्दम्  
टटं टटंटं टटटं टटंटः ॥६॥

© KTBS NOT TO BE REPUBLISHED

**अन्वयार्थः**

१. कस्तूरी=कस्तूरी नाम सुगन्धद्रव्यं, कस्मात्=कुतः जायते=उद्गच्छति करिणां=गजानां, कुलं=समूहं, कः=कः वीरः, हन्ति = मारयति, कातरः = भीतस्वभावः पुरुषः, युद्धे=सङ्ग्रामे, किं कुर्यात्=किं करोति , मृगात्=मृगस्य कारणात्, सिंहः=मृगराजः, पलायते=दूरं धावति।

(अत्र प्रथमपादत्रयं प्रश्नाः। तेषां प्रश्नानाम् उत्तराणि चतुर्थे पादे क्रमशः भवन्ति)।

२. भोजनान्ते= आहारसेवनस्य अन्तिमघट्टे किं पथ्यम्= किं हितकरम्, जयन्तः= जयन्तः नाम देवपुरुषः कस्य वै पुत्रः = कस्य सुतः। विष्णुपदं = भगवतः हरेः स्थानं, कथं प्रोक्तं =कथं प्राप्तुं शक्यम् ,तक्रं = मथितं दधि शक्रस्य = इन्द्रस्य, दुर्लभं = अशक्यम्, (अत्र प्रथमपादत्रयं प्रश्नाः। तेषां प्रश्नानाम् उत्तराणि चतुर्थे पादे क्रमशः भवन्ति।)

३. केशवं = श्रीकृष्णं - जले मृतशरीरम् इति अर्थद्वयम्। पतितं=पदच्युतं दृष्ट्वा कौरवाः = धार्तराष्ट्राः काकाः इति अर्थद्वयम्। रुदन्ति=विलपन्ति हा के = जले शवः = मृतशरीरम् पतितम् इत्यर्थः।

४. सीमन्तिनीषु=स्त्रीषु शान्ता=अनुद्विग्ना का?

गुणोत्तमः=श्रेष्ठगुणयुक्तः राजा=नृपः कः अभूत्?=कः आसीत्?

विद्वद्भिः=विचक्षणैः सदा=सर्वदा वन्द्या=पूजिता का?

अत्र एव=अस्मिन् श्लोके एव उक्तम्=कथितम् न बुद्ध्यते= न ज्ञायते।

(अत्र त्रिषुपादेषु प्रथमाक्षरं तथा अन्तिमाक्षरमेलनेन उत्तरं सिद्धं भवति यथा - सीता, रामः, विद्या इति।)

५. पक्वानि = फलितानि जम्बूफलानि = जम्बू इति मधुरफलविशेषम् कपि कम्पितशाखाभ्यः = वानरैः कम्पमानेभ्यः शाखाभ्याः गुळु गुळु इति शब्दं कुर्वाणानि पतन्ति।

© KTBS NOT TO BE REPUBLISHED

६. राज्याभिषेके = नृपस्य अभिषेचनसमारम्भसमये मदविह्वलायाः = सुरापानं कृत्वा मत्तायाः तरुण्याः नववनितायाः हस्तच्युतः=करात् च्युतः हेमघटः = सुवर्णकुम्भः सोपानमासाद्य = सोपानमार्गम् पतितः कुम्भः टटं टटंटं इति शब्दं ध्वानिं वा करोति।

## अभ्यासः

### १. मौखिकप्रश्नाः

१. मृगराजः कः?
२. केशवः इत्युक्ते कः?
३. पाण्डवानां जननी का?
४.श्रीरामः कीदृशः राजा?

### २. एकवाक्येन उत्तरं लिखत।

१. कस्तूरी कस्मात् जायते?
२. जयन्तः कस्य सुतः?
३. स्त्रीषु शान्ता का?
४. गुणोत्तमः राजा कः?
५. जम्बूफलानि कुतः पतन्ति?
६. मदविह्वलायाः तरुण्याः हस्तात् कः च्युतः?

### ३. सन्धिं कृत्वा नाम लिखत।

१. गुण + उत्तमः    २. राज्य + अभिषेकः
३. अत्रैव + उत्तम्

### ४. रिक्तस्थानानि पूरयत।

१. को हन्ति ____________ कुलम् ?
२. कथं ____________ प्रोक्तम्?

NOT TO BE REPUBLISHED @KTBS

३. केशवं पतितं दृष्ट्वा ______________ हर्षनिर्भराः।

४. जम्बूफलानि पक्वानि ______________ विमले जले।

५. सोपानमासाद्य ______________ शब्दम्।

## ५. संयोज्य योग्यवाक्यं रचयत।

| | | |
|---|---|---|
| १. श्रीविष्णुभागवते | अष्टादशपर्वाणि | |
| २. श्रीमद्रामायणे | चत्वारः | अस्ति। |
| ३. श्रीमद्भगवद्गीतायाम् | षट् | |
| ४. श्रीमन्महाभारते | पञ्च उच्छ्वासाः | |
| ५. वेदाः | द्वादशस्कन्दाः | सन्ति। |
| ६. वेदाङ्गानि | सप्त काण्डाः | |
| ७. संस्कृतभाषा | अष्टादश अध्यायाः | |
| | सुलभा | |

@KTBS NOT TO BE REPUBLISHED

### अवगच्छत।

- ✻ चत्वारः वेदाः सन्ति। षट् वेदाङ्गानि सन्ति।
- ✻ श्रीविष्णुभागवते द्वादशस्कन्दाः सन्ति।
- ✻ श्रीमद्रामायणे सप्तकाण्डाः सन्ति।
- ✻ श्रीमन्महाभारते अष्टादशपर्वाणि सन्ति। तत्र शतसहस्र - श्लोकाः सन्ति।
- ✻ श्रीमद्भगवद्गीतायाम् अष्टादश-अध्यायाः सन्ति। तत्र सप्तशतश्लोकाः सन्ति।

✻.✻.✻.✻

# एकविंशतः पाठः

## सङ्ख्यावाचकाः

सङ्ख्यां वदन्ति, बोधयन्ति इति सङ्ख्यावाचकाः। एकम्, द्वे, त्रीणि इत्यादयः सङ्ख्यावाचकाः। एकशब्दः नित्यम् एकवचनान्तः। द्विशब्दः नित्यं द्विवचनान्तः त्रिशब्दात् आरभ्य नवदशशब्दान्ताः सर्वे नित्यं बहुवचनान्ताः। विंशतिशब्दात् आरभ्य सर्वे नित्यम् एकवचनान्ताः।

एक-द्वि-त्रि-चतुर् इत्येतेषां शब्दानां त्रिषु लिङ्गेषु रूपभेदाः सन्ति। यथा- एकः बालकः। एका बालिका। एकं पुस्तकम्।

द्वौ बालकौ । द्वे बालिके। द्वे पुस्तके।

त्रयः बालकाः। तिस्रः बालिकाः। त्रीणि पुस्तकानि।

चत्वारः बालकाः। चतस्रः बालिकाः। चत्वारि पुस्तकानि।

NOT TO BE REPUBLISHED @KTBS

### सङ्ख्यावाचकाः

| | | | |
|---|---|---|---|
| २१. | एकविंशतिः | ३१. | एकत्रिंशत् |
| २२. | द्वाविंशतिः | ३२. | द्वात्रिंशत् |
| २३. | त्रयोविंशतिः | ३३. | त्रयस्त्रिंशत् |
| २४. | चतुर्विंशतिः | ३४. | चतुस्त्रिंशत् |
| २५. | पञ्चविंशतिः | ३५. | पञ्चत्रिंशत् |
| २६. | षड्विंशतिः | ३६. | षट्त्रिंशत् |

| | | | |
|---|---|---|---|
| २७. | सप्तविंशतिः | ३७. | सप्तत्रिंशत् |
| २८. | अष्टाविंशतिः | ३८. | अष्टात्रिंशत् |
| २९. | नवविंशतिः | ३९. | नवत्रिंशत् |
| ३०. | त्रिंशत् | ४०. | चत्वारिंशत् |
| ४१. | एकचत्वारिंशत् | ४६. | षट्चत्वारिंशत् |
| ४२. | द्विचत्वारिंशत् | ४७. | सप्तचत्वारिंशत् |
| ४३. | त्रिचत्वारिंशत् | ४८. | अष्टचत्वारिंशत् |
| ४४. | चतुश्चत्वारिंशत् | ४९. | नवचत्वारिंशत् |
| ४५. | पञ्चचत्वारिंशत् | ५०. | पञ्चाशत् |

## छात्राभ्यासः

## ।।समयनिर्देशः।।



चतुर्वादनम्



सपादचतुर्वादनम्



सार्धत्रिवादनम्



पादोनपञ्चवादनम्



दशाधिकदशवादनम्



दशन्यूनअष्टवादनम्

©KTBS NOT TO BE REPUBLISHED

## १. कोष्टकं दृष्ट्वा रिक्तस्थानं पूरयत।

**उदाहरणम् -**

भवान् कदा शालां गच्छति?

अहं नववादने शालां गच्छामि?

१. सः ____________वादने शयनात् उत्तिष्ठति।( ४.३० )

२. छात्रः ____________वादने गृहमागच्छति। ( ४.०० )

३. बालकाः सायं ____________वादने क्रीडन्ति।( ६.०० )

४. रात्रौ ____________वादने शयनं करणीयम्। ( १०.१५ )

**उदाहरणम् -**

७. ३० – सार्धअष्टवादनम्।

८. ४५ – ________________________________।

९. १० – ________________________________।

१०. ४५ – ________________________________।

@KTBS NOT TO BE REPUBLISHED

## २. अभ्यासं कुरुत।

१. एकं ब्रह्म ।

२. द्वौ पक्षौ → शुक्लपक्षः, कृष्णपक्षः।

द्वे अयने → दक्षिणायनम्, उत्तरायनम्।

३.	त्रीणि वचनानि →एकवचनम्, द्विवचनम्, बहुवचनम्।

४.	चत्वारि खाद्यानि →भक्ष्यम्, भोज्यम्, लेह्मम्, चोष्यम्।

५.	पञ्च भूतानि →भूतलम्, जलम्, पावकः, पवनः, आकाशः।

६.	षड् ऋतवः → वसन्तः, ग्रीष्मः, वर्षा, शरत्, हेमन्तः, शिशिरः।

७.	सप्त ऋषय →कश्यपः, अत्रिः, भरद्वाजः, विश्वामित्रः, गौतमः, जमदग्निः, वसिष्ठः।

८.	अष्टदिक्पालकाः →इन्द्रः, अग्निः, यमः, निर्ऋतिः, वरुणः, वायुः, कुबेरः, ईशानः।

९.	नवग्रहाः → रविः, सोमः, भौमः, बुधः, गुरुः, शुक्रः, शनिः, राहुः, केतुः।

१०.	दश अवताराः → मत्स्यः, कूर्मः, वराहः, नरसिंहः, वामनः, भार्गवः, श्रीरामः, श्रीकृष्णः, बुद्धः, कल्किः।

*.*.*.*

@KTBS NOT TO BE REPUBLISHED

✻ **सप्तवासराः**

१. भानुवासरः २. सोमवासरः ३. मङ्गलवासरः
४. बुधवासरः ५. गुरुवासरः ६. शुक्रवासरः
७. शनिवासरः

✻ **पञ्चदशतिथयः -**

१. प्रतिपत् २. द्वितीया ३. तृतीया ४. चतुर्थी
५. पञ्चमी ६. षष्ठी ७. सप्तमी ८. अष्टमी
९. नवमी १०. दशमी ११. एकादशी
१२. द्वादशी १३. त्रयोदशी १४. चतुर्दशी
१५. पूर्णिमा (शुक्लपक्षस्य अन्तिमदिनम्) अमावास्या (कृष्णपक्षस्य अन्तिमदिनम्)

@KTBS
NOT TO BE REPUBLISHED



# परिशिष्टम्

## भाषान्तरकला

कयाचित् भाषया निरूपितस्य विषयस्य अन्यया भाषया निरूपणं भाषान्तरं भवति। संस्कृतोक्तस्य कर्णाटकभाषया, कर्णाकोक्तस्य संस्कृतभाषया च निरूपणं न सुलभम्। अत्र द्वयोः भाषयोः नैपुण्यं आवश्यकम्। तेन भाषान्तरकरणं सुलभं भवति।

### १. अत्र लट्लकारस्य प्रयोगः अस्ति

**अ. कर्णाटकभाषया परिवर्तयत।**

१. बालकः कन्दुकेन क्रीडति।
२. त्वं फलम् इच्छसि।
३. अहं स्तोत्रं पठामि।
४. वयं देवालयं गच्छामः।
५. वृक्षाः परोपकाराय फलन्ति।

**आ. संस्कृतभाषया परिवर्तयत।**

१. ರಾಮನು ಹಾಲನ್ನು ಕುಡಿಯುತ್ತಾನೆ.
२. ನೀನು ಅನ್ನವನ್ನು ತಿನ್ನುತ್ತೀಯೆ.
३. ನಾನು ಸಂಸ್ಕೃತವನ್ನು ಓದುತ್ತೇನೆ.
४. ಮುನಿಗಳು ಕಾಡಿನಲ್ಲಿ ವಾಸಿಸುತ್ತಾರೆ.
५. ಅವಳು ಹಣ್ಣನ್ನು ತಿನ್ನುತ್ತಾಳೆ.

### ३. अत्र लङ्लकारस्य प्रयोगः वर्तते।

**अ. कर्णाटकभाषया परिवर्तयत।**

१. सः पाठम् अलिखत्।
२. त्वं चलच्चित्रम् अपश्यः।

NOT TO BE REPUBLISHED @KTBS

३. अहं पाठशालाम् अगच्छम्।

४. बालिकाः वस्त्राणि अनयन्।

५. माता पाकम् अकरोत्।

**आ. संस्कृतभाषया परिवर्तयत।**

1. ಅವನು ರಾಮಾಯಣವನ್ನು ಓದಿದನು.
2. ನೀವು ಶಾಲೆಗೆ ಹೋಗಿರಿ.
3. ನಾನು ಉಪವನಕ್ಕೆ ಹೋದೆನು.
4. ಹುಡುಗರು ಚೆಂಡಿನಿಂದ ಆಡಿದರು.
5. ನಾವಿಬ್ಬರು ಉತ್ತರವನ್ನು ಬರೆದೆವು.

*.*.*.*

@KTBS
NOT TO BE REPUBLISHED

## अमरकोशसङ्ग्रहः (कण्ठपाठार्थमेव)

मनुष्या मानुषा मार्त्या मनुजा मानवा नराः। ಮನುಷ್ಯ
स्युः पुमांसः पञ्चजनाः पुरुषाः पूरुषानरः ।।
प्रमदा मानिनी कान्ता ललना च नितम्बिनी। ಸ್ತ್ರೀ-ಸುಂದರ ಸ್ತ್ರೀ
सुन्दरीरमणी रामा कोपना सैव भामिनी।।
राजा राट् पर्थिवः क्ष्माभृत्नृपभूपमहीक्षितः। ರಾಜ
मन्त्री धीसचिवोऽमात्योऽन्ये कर्मसचिवास्ततः। ಮಂತ್ರಿ
उक्षा भद्रो बलीवर्द ऋषभो वृषभोवृषः। ಎತ್ತು
वराहः सूकरो घृष्टिः कोलः पोत्री किरिः किटिः। ಹಂದಿ
दंष्ट्री धोणी स्तब्धरोमा क्रोडोभूधार इत्यपि।।
कपिप्लवङ्गः प्लवगः शाखामृगवलीमुखाः ।। ಕೋತಿ
लुलायो महिषो वाहद्विषत्कासर सैरिभाः।। ಕೋಣ
श्रृगालवञ्चकः क्रोष्टु फेरु फेरव जम्बुकाः । ನರಿ
ओतुर्बिडालो मार्जारो वृषदंशक आखुभुक्।। ಬೆಕ್ಕು
मृगे कुरङ्ग वातायुः हरिणाजिनयोनयः। ಜಿಂಕೆ
कृकवाकुस्ताम्रचूडः कुक्कुटश्चरणायुधः।। ಕೋಳಿ
चटकः कलविङ्कः स्यात्तस्यस्त्री चटका तयोः। ಗುಬ್ಬಚ್ಚಿ
वनप्रियः परभृतः कोकिलः पिक इत्यपि।। ಕೋಗಿಲೆ
काके तु करटारिष्ट बलिपुष्ट सकृत्प्रजाः। ಕಾಗೆ
ध्वाङ्क्षात्मघोषपरभृद्बलिभुग्वायसा अपि।।

*.*.*.*

NOT TO BE REPUBLISHED © KTBS

# पाठयोजना

| मासाः | पाठाः | अवधयः |
|---|---|---|
| Zdå~a | JrVm_V_, nmOH$j Ì_, g~ÝVàH$aU_-2, {VL>ÝVàH$aU_-2 | 16 |
| {Sgå~a | XemdVma: ^mJ: 2, gpÝYàH$aU_, g^m{fVm{Z | 16 |
| OZd[a | AY{ZH$: gñH$VH${d:, àmMrZ{dkm{ZZ: | 16 |
| \$~d[a | AmOmX: MÝÐe I a:, MmQ íbmH$m: | 16 |
| _mM | gL>»`mdmMH$:, ^mfmÝVamä`mg:, nZamdVZ_ | 16 |
| | | 80 |

@KTBS
NOT TO BE REPUBLISHED